# 66 - षड्षष्टितम दशकम्
# गोपीजन आह्लादनम्

उपयातानां सुदृशां कुसुमायुध बाण पात विवशानाम् ।
अभिवाञ्छितं विधातुं कृतमति रपि ता जगाथ वाम मिव ॥ ॥66-1॥

गगन गतं मुनि निवहं श्रावयितुं जगिथ कुल वधू धर्मम् ।
धर्म्यं खलु ते वचनं कर्म तु नो निर्मलस्य विश्वास्यम् ॥ ॥66-2॥

आकर्ण्य ते प्रतीपां वाणीम् एणीदृशः परं दीनाः ।
मा मा करुणा सिन्धो परित्य जेत्यति चिरं विलेपुस् ताः ॥ ॥66-3॥

तासां रुदितैर् लपितैः करुणाकुल मानसो मुरारे त्वम् ।
ताभिस् समं प्रवृत्तो यमुना पुलिनेषु काम मभिरन्तुम् ॥ ॥66-4॥

चन्द्र कर स्यन्द लसत् सुन्दर यमुना तटान्त वीथीषु ।
गोपीज नोत्तरीयैः आपादित संस्तरो न्यषीदस् त्वम् ॥ ॥66-5॥

सुमधुर नर्मालपनैः कर संग्रहणैश्च चुम्ब नोल्लासैः ।
गाढालिङ्गन सङ्गैः त्व मङ्गना लोक माकुली चकृषे ॥ ॥66-6॥

वासो हरण दिने यत् वासो हरणं प्रतिश्रुतं तासाम् ।
तदपि विभो रस विवश स्वान्तानां कान्त सुभ्रुवा मदधाः ॥ ॥66-7॥

कन्दलित घर्म लेशं कुन्द मृदु स्मेर वक्त्र पाथोजम् ।
नन्द सुत त्वां त्रिजगत् सुन्दर मुपगूह्य नन्दिता बालाः ॥ ॥66-8॥

विरहेष्वङ्गा रमयः शृङ्गार मयश्च सङ्गमे हि त्वम्
नितरा मङ्गार मयः तत्र पुनस् सङ्गमेऽपि चित्र मिदम् ॥ ॥66-9॥

राधा तुङ्ग पयोधर साधु परीरम्भ लोलु पात्मानम् ।
आराधये भवन्तं पवन पुराधीश शमय सकल गदान् ॥ ॥66-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥